# shrImahAdevakRitaM rAmastotram

# શ્રીરામસ્તોત્રં શ્રીમહાદેવકૃતમ્

## Document Information

Text title : mahAdevakRitaM rAmastotram

File name : mahaadevaraamastotra.itx

Category : raama, stotra

Location : doc_raama

Author : mahaadeva

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : adhyAtmarAmAyaNa

Latest update : January 05, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 17, 2022

*sanskritdocuments.org*

# શ્રીરામસ્તોત્રં શ્રીમહાદેવકૃતમ્

શ્રી ગણેશાય નમઃ ।
શ્રીમહાદેવ ઉવાચઃ ।
નમોઽસ્તુ રામાય સશક્તિકાય નીલોત્પલશ્યામલકોમલાય ।
કિરીટહારાઙ્ગદભૂષણાય સિંહાસનસ્થાય મહાપ્રભાય ॥ ૧॥

ત્વમાદિમધ્યાન્તવિહીન એકઃ સૃજસ્યવસ્યત્સિ ચ લોકજાતમ્ ।
સ્વમાયયા તેન ન લિપ્યસે ત્વં યત્સ્વે મુખેઽજસ્રરતોઽનવદ્યઃ ॥ ૨॥

લીલાં વિધત્સે ગુણસંવૃતસ્ત્વં પ્રપન્નભક્તાનુવિધાનહેતોઃ ।
નાનાવતારૈઃ સુરમાનુષાદ્યૈઃ પ્રતીયસે જ્ઞાનિભિરેવ નિત્યમ્ ॥ ૩॥

સ્વાંશેન લોકં સકલં વિધાય તં બિભર્ષિ ચ ત્વં તદધઃ ફણીશ્વરઃ ।
ઉપર્યધો ભાન્વનિલોડુપૌષધીપ્રવર્ષરૂપોઽવસિ નૈકધા જગત્ ॥ ૪॥

ત્વમિહ દેહભૃતાં શિખિરૂપઃ પચસિ ભક્તમશેષમજસ્રમ્ ।
પવનમઞ્ચકરૂપસહાયો જગદખણ્ડમનેન બિભર્ષિ ॥ ૫॥

ચન્દ્રસૂર્યશિખિમધ્યગતં યત્તેજ ઈશ ચિદશેષતનૂનામ્ ।
પ્રાભવત્તનુભૃતામિહ ધૈર્યં શૌર્યમાત્રમખિલં તવ સત્ત્વમ્ ॥ ૬॥

ત્વં વિરિઞ્ચિશિવવિષ્ણુવિભેદાત્ કાલકર્મશશિસૂર્યવિભાગાત્ ।
વાદિનાં પૃથગિવેશ બિભાસિ બ્રહ્મ નિશ્ચિતમનન્યદિહૈકમ્ ॥ ૭॥

મત્સ્યાદિરૂપેણ યથા ત્વમેકઃ શ્રુતો પુરાણેષુ ચ લોકસિદ્ધઃ ।
તથૈવ સર્વં સદયદ્વિભાગસ્ત્વમેવ નાન્યદ્ભવતો વિભાતિ ॥ ૮॥

યદ્યત્સમુત્પન્નમનન્તસૃષ્ટાવુત્પત્સ્યતે યચ્ચ ભવચ્ચ યચ્ચ ।
ન દૃશ્યતે સ્થાવરજઙ્ગમાદૌ ત્વયા વિનાઽતઃ પરતઃ પરસ્ત્વમ્ ॥ ૯॥

તત્ત્વં ન જાનન્તિ પરાત્મનસ્તે જનઃ સમસ્તાસ્તવ માયયાઽતઃ ।
ત્વદ્ભક્તસેવામલમાનસાનાં વિભાતિ તત્ત્વં પરમેકમૈશમ્ ॥ ૧૦॥

બ્રહ્માદયસ્તે ન વિદુઃ સ્વરૂપં ચિદાત્મતત્વં બહિરર્થભાવાઃ ।
તતો બુધસ્ત્વામિદમેવ રૂપં ભક્ત્યા ભજન્મુક્તિમુપૈત્યદુઃખઃ ॥ ૧૧॥

અહં ભવન્નામગુણૈઃ કૃતાર્થો વસામિ કાશ્યામનિશં ભવાન્યા ।
મુમૂર્ષમાણસ્ય વિમુક્તયેઽહં દિશામિ મન્ત્રં તવ રામનામ ॥ ૧૨॥

ઇમં સ્તવં નિત્યમનન્યભક્ત્યા શ‍ૃણ્વન્તિ ગાયન્તિ લિખન્તિ યે વૈ ।
તે સર્વસૌખ્યં પરમં ચ લબ્ધ્વા ભવત્પદં યાન્તુ ભવત્પ્રસાદાત્ ॥ ૧૩॥

॥ ઇતિ શ્રીમદધ્યાત્મરામાયણે શ્રીમહાદેવકૃતં રામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

---

*shrImahAdevakRitaM rAmastotram*

pdf was typeset on December 17, 2022

Please send corrections to *sanskrit@cheerful.com*